# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2018**

**FIRST YEAR [BATCH 2017-20]**

Date : 24/05/2018 **SANSKRIT (General)**

Time : 11 am – 2 pm **Paper : II** Full Marks : 75

1. **<u>एकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [1×10]

   क) स्वप्रवासवदत्तनाटकस्य कस्मिन् अङ्के स्वप्नवृत्तान्तः विराजते? स्वप्नवृत्तान्तः संक्षेपेण उपस्थापनीयः। वृत्तान्तस्यास्य नाटकीयं तात्पर्यं व्याख्याय नाटकस्यास्य नामकरणे तस्य प्रभावं व्याख्यात। [1+3+4+2]

   ख) भवदध्येतव्यस्य भासरचितदृश्यकाव्यस्य प्रथमाङ्कस्य वृत्तान्तः संक्षेपेणोपन्यसनीयः।

2. **<u>एकस्य</u>** पद्यस्यानुवादः करणीयो वङ्गभाषया आङ्गलभाषया वा। [1×5]

   क) भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
   पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।
   यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
   तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव।।

   ख) कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
   दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
   आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
   यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्।।

3. **<u>एकं</u>** पद्यं सप्रसङ्गं व्याख्यायताम्। [1×6]

   क) यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
   अथायं विभ्रमो नाम विभ्रमो ह्यस्तु मे चिरम्।।

   ख) सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।
   सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।।

4. प्रश्न**<u>द्वयं</u>** समाधेयम्। [2×2]

   क) प्रद्योतः कः? तत्पुत्रौ कौ?

   ख) सम्मुखभागे तपोवनमिति ब्रह्मचारी केन प्रकारेण ज्ञातवान्?

   ग) कौतुकमालिकारचनाकाले वासवदत्ता किमौषधं त्यक्तवती? किमौषधञ्च अधिकतया गृहीतवती?

   घ) का कस्माद्धेतोस्त्रिपथगेति कथ्यते?

5. **<u>एकः</u>** प्रश्नः समाधेयः। [1×10]

   क) कालिदासविरचितं किं महाकाव्यं भवतां पाठ्यमस्ति? अत्र कति सर्गाः? प्रथमसर्गस्य नाम किम्? सर्गेऽस्मिन् दिलीपपूर्ववर्तिनृपाणाम् इक्ष्वाकुवंशोद्भवानां चारित्रिकवैशिष्ट्यं यदुपलभ्यते तदत्र संक्षेपेणोपस्थाप्यताम्। [1+1+1+7]

   ख) दिलीपः कः? का च तत्पत्नी? किमर्थं दिलीपः अपुत्रकः आसीत्? पुत्रलाभाय कुलगुरुणा वशिष्ठेन किं समाधानम् उक्तम्? [1+1+4+4]

6. **<u>एकस्य</u>** पद्यस्यानुवादः कार्य आङ्गलभाषया वङ्गभाषया वा। [1×6]

   क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
   तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

7. **एकं** पद्यं सप्रसङ्गं व्याख्येयम्। [1×8]

क) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।

ख) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।

8. प्रश्न**त्रयं** समाधेयम्। [3×2]

क) राज्यस्य सप्त अङ्गानि कानि?

ख) षड्जादयः सप्त स्वराः के?

ग) 'अध्वरस्येव दक्षिणा' का आसीत्? अध्वरशब्दस्य कोऽर्थः?

घ) शुद्धवंश्या सन्ततिः कुत्र कुत्र शर्मणे भवति?

ङ) सूर्यवंशस्य प्रथमः पुरुषः कः? तस्य तुलना कविना केन सह विहिता?

9. पद**पञ्चके** सव्यासवाक्यं समासो निर्णेयः। [5×2]

क) निर्मक्षिकम्

ख) व्याघ्रभयम्।

ग) नीलोत्पलम्

घ) केशाकेशि

ङ) राजर्षिः

च) तुषारधवलः

छ) अहिनकुलम्

ज) वीणापाणिः

10. यथाभिलाषं **षण्णां** परिणतरूपाणि लेख्यानि। [6×1]

क) दशरथ + अण्

ख) ज्ञान + मतुप्

ग) √गम् + क्तवतु

घ) शास् + क्यप्

ङ) √दा + अनीयर्

च) √सेव् + शानच्

छ) अधि – कृ + ल्यप्

ज) बहु + ईयसुन्

झ) माया + विनि

ञ) वह् + तुमुन्

11. युगल**द्वयस्य** अर्थगतं पार्थक्यं प्रदर्शनीयं **वाक्यरचनया**। [2×2]

क) महाराजः, महाराजा

ख) यजते, यजति

ग) मित्रः, मित्रम्

घ) सुगन्धः, सुगन्धि

———— × ————